लोकप्रियसाहित्यग्रन्थमाला - २२

# भारतवर्षम्

## ( हृन्मञ्जूषायां लघुः स्वप्नः कोऽपि )

उत्कलभाषया मूलरचनाकारः
सीताकान्तमहापात्रः

संस्कृतानुवादकः
भागीरथिनन्दः

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

लोकप्रियसाहित्यग्रन्थमाला - २२

# भारतवर्षम्

(हृन्मञ्जूषायां लघुः स्वप्नः कोऽपि)


उत्कलभाषया मूलरचनाकारः

डॉ. सीताकान्तमहापात्रः

संस्कृतानुवादकः

डॉ. भागीरथिनन्दः



राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# प्राक्कथनम्

पुस्तकमिदं सङ्गमस्थलं त्रयाणां स्रोतसाम्। तत्र देशः -यस्य ध्यानमग्नेऽसीमस्वप्ने विजडिता अगणिताः स्मृतयः, मम कतिपयकलाकारमित्राणामवदानम्, प्रकम्पितशब्दहस्तेन स्वप्नस्य तस्य रूपणे मम यथाशक्ति प्रवृत्तिश्च।

कालातीतायाः सुप्राचीनायाश्च सभ्यतायाः सैषाऽमरभूमिः सर्वदैव वर्तमाना। समयस्यायमारम्भाद् बहुपूर्वमेवास्या जन्मतिथिः। अक्लान्तपदैः सञ्चलन्ती समायातैषा सुदीर्घं पन्थानमतिक्रम्य भूतत्त्वात्, परातत्त्वात्, इतिहासाच्च नः साम्प्रतिकं कालं यावत्।

अस्या एव स्मृतौ गुम्फितान्यगणितान्युपाख्यानानि। आदिगन्तात् प्रसृतायां समतलभूमौ "चरैवेति चरैवेति" प्रगायतां मानवानां स्रोतांसि। पाषाणगुहासु, कलनादिनीनां च नदीनां तटेषु विगुञ्जितो मर्मस्पृक् स्वरः। सा स्मरति बोधिद्रुमं, रुधिररञ्जितखड्गसङ्घातेनासङ्ख्यमृत्यून्, गतच्छत्रगृहेषु क्षुत्क्षामोदराणां जीवनायावाहनम्, शान्तपर्वतोदरेषु ध्यानमग्नाँश्च ऋषीन्। साऽपि स्मरति सकलं स्नेहं, सर्वं वैरं, समस्तं क्रन्दनं, निखिलं स्मितम्, अखिलां शून्यतां, पुञ्जितां च परिपूर्णताम्।

अहं तत्प्रेमाबद्धो मम ज्ञानोदयात् परम्। तस्याः सा सुरभिता मृत्तिका, यस्यामवतीर्णास्तारकाः। सैषा मृत्तिका, यस्या वक्षसि पवनेन समीरितं हरिद्वर्णं शस्यक्षेत्रम्, नभसो मेघेन नीरन्ध्रतया या च योजिता गगनेन सह। अहं जीवितस्तस्या एव स्वर्गे। मृतश्च तस्या एव नरके। सा मे प्रियतमा, अन्तरङ्गः शत्रुरपि।

नवसर्गेषु समुपस्थापयितुं तत्कथां ममेयं प्रवृत्तिः। स्मृतिलिपिरियं सुदीर्घसमयस्य, अगणितानामाशाहताशानाम्, स्वप्न-स्वप्नभङ्गयोः, असीमक्रोध-क्षोभ-शान्तमुहूर्त्तानाम्।

मूलरचनाकारः

**सीताकान्तमहापात्रः**

(उत्कलभाषातः संस्कृतानुवादः)

# सूची


| | | |
|---|---|---|
| प्रथमः सर्गः | मङ्गलाचरणम् | ३ |
| द्वितीयः सर्गः | यात्रा | २९ |
| तृतीयः सर्गः | नूतना रासलीला | ४५ |
| चतुर्थः सर्गः | देवीपूजा | ५७ |
| पञ्चमः सर्गः | अपरेऽपि ये नचिकेतसः | ७७ |
| षष्ठः सर्गः | वैश्वानराय आहूतिः | ९१ |
| सप्तमः सर्गः | तं वृद्धमवीक्ष्यापि कियद् रुरुदिम वयम्! | १०५ |
| अष्टमः सर्गः | कं वा पृच्छेम? | ११९ |
| नवमः सर्गः | स्वप्नायनम् : सुदीर्घा सरणी | १३३ |

सर्वमेव विज्ञाय सम्यग् वयं
प्रस्तावितशान्तिसन्धौ कुर्मो हस्ताक्षरम्
शान्तिसन्धिः घातकस्य हतस्य च
असिमण्डलनिस्सृतरुधिरधारायाः, प्रणवध्वनेश्च;
अस्याः पृथिव्या अविस्मार्यानन्दस्य
स्वर्गलोकाप्सरसां च;
रौरवनरकस्य, वैकुण्ठस्य च
हालाहलस्य, अमृतस्य च
अनाहारमृत्योः गङ्गाकूले स्वेच्छामृत्योश्च
सामगानस्य, रे-रेकारस्य च।।

कदा कदा संदृश्यन्ते
आश्रमाः, निर्जन-पर्णकुटीराणि,
ग्रामाः, वसतयः, जनाकीर्णनगराणि,
शाखागुच्छमृन्निर्मितभित्तयः, गोणीवेष्टितगृहाणि,
पञ्चतारकाविलाससदनानि च।
सर्वाण्येतानि स्वस्वस्थानेषु;
कदापि च दुर्निवार्यघूर्ण्या
तान्येतानि विनश्यन्ति
इतिहासो दारुणो दुःस्वप्न इव राहुग्रस्तो भवति



योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्


राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली